# राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालय:)

नई–दिल्ली–110058

## शास्त्रप्रशिक्षणकार्यक्रम: (2018–19)

संस्कृतम् अस्माकमात्मा विवेकस्य च वाणी अस्ति। या भाषा निखिलेऽस्मिन् विश्वे अनेकतासु एकतामापादयति, संस्कारं जनयति, मानवसमाजं हिते नियोजयति, अध्यात्मविद्यां पोषयति, ऋषीणां विद्यां सन्दधाति, सर्वा: विद्या: सम्वर्धयति, भारतीयां संस्कृतिं परिपुष्णाति, सर्वभाषाणां जनयित्री सा संस्कृतभाषा सदा नमस्या भवति। तस्यामेव भाषायां भारतीयमनीषिभि: ऋषिभि: सुरचितानि अनर्घरत्नतुल्यानि शास्त्राणि। ऋषिभि: सृष्टानि शास्त्राणि यथा सुरक्षितानि स्यु: तेषां शास्त्राणां प्रचारप्रसार: बहुलतया भवेत् तदुद्देश्येन भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम्। ऋषिसृष्टविद्याया: रक्षणम्, परम्पराया: सम्वर्धनं शास्त्राध्येतृणां संख्याभिवर्धनार्थं कटिबद्धसंस्थानं समग्रेऽपि राष्ट्रे परिसरान् संस्थाप्य शास्त्राणामध्ययनाध्यापनपरम्परामद्यापि उज्जीवयति, शास्त्रेषु अभिरुच्युत्पादनार्थं प्रतिभाया: प्रोत्साहनार्थं च अखिलभारतीयशास्त्रीयभाषणस्पर्धा: शलाकापरीक्षासदृशा: अनेकप्रतियोगिता: आयोजयति, न केलवमेतत् विविधपरिसरेषु विविधान् शास्त्रीयप्रकल्पान् अपि संचालयति। एतादृशेषु अन्यतमकार्यक्रम: अस्ति शास्त्रप्रशिक्षणम् इति। अस्य शास्त्रप्रशिक्षणस्य स्वरूपं कीदृशं स्यात्। अस्य प्रयोजनं किम् इति प्रस्तूयते।

### शास्त्रप्रशिक्षणस्य स्वरूपम्

प्रशिक्षणकार्यक्रमोऽयं चितेषु परिसरेषु एकस्मिन् शैक्षणिकसत्रे पर्यायद्वयेन संचालितो भविष्यति। दिसम्बरमासस्य अन्तिमसप्ताहे प्रथमचरणम् प्रारम्भिकशिक्षणम्, मईमासस्य तृतीयसप्ताहत: द्वितीयचरणं प्रगतप्रशिक्षणम् आयोजयिष्यते।

प्रारम्भिकप्रशिक्षणस्य अवधि: 10 दिनानि, प्रगतप्रशिक्षणस्य च अवधि: 30 दिनानि निर्दिष्टानि। प्रशिक्षणे भागग्रहणाय **शास्त्रितृतीयवर्षे अधीयाना: आचार्यप्रथमवर्षे द्वितीयवर्षे च अधीयाना: छात्रा: अर्हा: भविष्यन्ति**। साहित्ये, व्याकरणे, ज्योतिषे च अधीयाना: छात्रा: स्वविषये विषयान्तरे वा (न्याये, वेदान्ते, मीमांसायां, सांख्यायोगे) शास्त्रार्थप्रशिक्षणवर्गे प्रवेशपरीक्षां दातुं शक्नुवन्ति तेषां योग्यतानुरूपम् एकस्मिन् विषये एव प्रशिक्षणार्थमनुमति: प्रदास्यते।

प्रथमचक्रप्रशिक्षणे प्रत्येकं शास्त्रे विभिन्नपरिसरेभ्य: चिता: विंशति: छात्रा: विषयानुगुणं निर्दिष्टेषु परिसरेषु आयोज्यमाने कार्यक्रमे भागं ग्रहीष्यन्ति। तेभ्य: छात्रेभ्य: परीक्षाद्वारा चिता: दश छात्रा: एव अग्रिमस्य मासात्मकस्य द्वितीयप्रशिक्षणचक्रस्य कृते योग्या: भविष्यन्ति।

प्रारम्भिकप्रशिक्षणे उत्तीर्णवतां कृते प्रत्येकं 2000/- रूप्यकाणि च, प्रगतप्रशिक्षणे उत्तीर्णवतां कृते प्रत्येकं 15000/- रूप्यकाणि च छात्रवृत्ति: प्रमाणपत्रं च प्रदास्यते।

<u>चयनपरीक्षा</u>

प्रत्येकं शास्त्रे प्रशिक्षणवर्गे भागग्रहणर्थ चयनपरीक्षा संस्थानस्य सर्वेषु परिसरेषु द्विनद्वये भविष्यति। परिक्षायां तत्तत्सम्बद्धशास्त्रात् प्रश्ना: भविष्यन्ति। परिक्षाया: आवेदनम् **ऑनलाईन** माध्यमेन भविष्यति। तत्र प्रथमदिने

1. **साहित्ये**
2. **व्याकरणे**
3. **ज्योतिषे**

च विषये चयनपरीक्षा सम्पत्स्यते। द्वितीये च दिवसे अवशिष्टिचतुर्षु विषयेषु चयनपरीक्षा विधास्यते। प्रत्येकं परिसरे सप्तसु विषयेषु चयनपरीक्षा भविता। **किन्तु अवधार्य यत्** साहित्यं व्याकरणं ज्योतिषं वा शास्त्रम् अधीयान: छात्र: विषयान्तरे न्यायशास्त्रे, वेदान्तशास्त्रे, मीमांसाशास्त्रे, सांख्यायोगशास्त्रे वा परीक्षां दातुमर्हति। साहित्यविषयम् अधीयान: छात्र: व्याकरणं ज्योतिषं वा, व्याकरणविषयम् अधीयान: छात्र: साहित्यं ज्योतिषं वा, ज्योतिषविषयम् अधीयान: छात्र: व्याकरणं साहित्यं वा चेतुं न शक्नोति।

एतस्मिन् प्रशिक्षणकार्यक्रमे सम्बद्धपरिसरस्य प्राचार्य: सम्बद्धशास्त्रविदुषां चयनं करिष्यति। प्रथमचक्रस्य कृते द्वयो: विदुषो: द्वितीयचक्रस्य कृते चतुर्णां विदुषां च नामानि प्रशिक्षणकार्यक्रमत: पूर्वं माननीयकुलपतीनाम् अनुमोदनार्थं प्रेषणीयानि भविष्यन्ति। प्रगतप्रशिक्षणं गुरूकुलपद्धत्या भविष्यति।

परिसरस्य प्राचार्या:/प्रभारिप्राचार्या: वा शास्त्रप्रशिक्षणकार्यक्रमस्य निर्वाहका: भविष्यन्ति। सम्बद्धशास्त्रस्य विद्वान् अध्यापक: अध्यापिका वा उपर्युक्तकार्यक्रमस्य समन्वयक: समन्वयिका वा भविष्यति।

## विषयानुगुणं प्रशिक्षणपरिसराः

| क्र.सं. | परिसरस्य नाम | शास्त्रम् |
|---|---|---|
| 1 | जयपुरपरिसरः, जयपुरम् (राजस्थानम्) | व्याकरणम् |
| 2 | लखनऊपरिसर, लखनऊ (उत्तरप्रदेशः) | साहित्यम् |
| 3 | भोपालपरिसरः, भोपालम् (मध्यप्रदेशः) | ज्योतिषम् |
| 4 | गुरुवायूरपरिसरः, गुरुवायूर (केरलम्) | वेदान्तः |
| 5 | गङ्गानाथझापरिसरः, इलाहाबाद (उत्तरप्रदेशः) | न्यायः |
| 6 | राजीवगान्धीपरिसरः, शृङ्गेरी (कर्नाटकम्) | मीमांसा |
| 7 | श्रीसदाशिवपरिसरः, पुरी (ओडिशा) | सांख्य-योग |

## निर्धारितपाठ्यांशः

| | | |
|---|---|---|
| 1 | **व्याकरणशास्त्रम्** | |
| | प्रथमचक्रम् | सिद्धान्तकौमुद्याः कारकप्रकरणम् (बालमनोरमाटीकासहितम्) |
| | द्वितीयचक्रम् | 1. वैयाकरणभूषणसारस्य धात्वर्थनिर्णयः<br>2. परमलघुमञ्जूषायाः शक्तिप्रकरणम् |
| 2 | **साहित्यशास्त्रम्** | |
| | प्रथमचक्रम् | नैषधीयचरितम् (13 सर्गः) |
| | द्वितीयचक्रम् | काव्यप्रकाशः (1-3 उल्लासपर्यन्तभागः) |
| 3 | **वेदान्तशास्त्रम्** | |
| | प्रथमचक्रम् | वेदान्तसारः (विद्वन्मनोरञ्जनीटीकासहितः) |
| | द्वितीयचक्रम् | वेदान्तपरिभाषा (प्रत्यक्षतः आगमपरिच्छेदपर्यन्तम् शिक्षामणिटीकासहितम्) |
| 4 | **सांख्यशास्त्रम्** | |
| | प्रथमचक्रम् | सांख्यकारिकामूलमात्रम् योगसूत्राणि च |
| | द्वितीयचक्रम् | सांख्यतत्त्वकौमुदी, व्यासभाष्यम् च (1-2 पादौ) |
| 5 | **मीमांसाशास्त्रम्** | |
| | प्रथमचक्रम् | अर्थसंग्रहः सम्पूर्णः |
| | द्वितीयचक्रम् | जैमिनीयन्यायमाला (प्रथमाध्यायतः तृतीयाध्यायपर्यन्तम्) |
| 6 | **न्यायशास्त्रम्** | |
| | प्रथमचक्रम् | न्यायसिद्धान्तमुक्तावली (प्रत्यक्षखण्डः) |
| | द्वितीयचक्रम् | न्यायसिद्धान्तमुक्तावली (अनुमानखण्डतः अन्तिमभागपर्यन्तम्) |
| 7 | **ज्यौतिषशास्त्रम्** | |
| | प्रथमचक्रम् | सूर्यसिद्धान्तः |
| | द्वितीयचक्रम् | बृहत्पाराशरहोराशास्त्रम् |

आवेदनदिनाङ्कः

| आरम्भदिनाङ्कः | अन्तिमदिनाङ्कः |
|---|---|
| 04.10.2018 | 26.10.2018 |

चयनपरीक्षादिनाङ्कः

| | |
|---|---|
| व्याकरणम्<br>साहित्यम्<br>ज्योतिषम् | **03-11-2018 (10:00 – 12:00)** |
| न्यायः<br>वेदान्तः<br>मीमांसा<br>सांख्यायोगः | **04-11-2018 (10:00 – 12:00)** |

<u>प्रशिक्षणस्य अवधिः</u>

प्रथमचक्रम्

| | | |
|---|---|---|
| प्रारम्भिकप्रशिक्षणम् | दशदिनानि | दिसम्बरमासस्य अन्तिमसप्ताहः |

द्वितीयचक्रम्

| | | |
|---|---|---|
| प्रगतप्रशिक्षणम् | त्रिंशत् दिनानि | मईमासस्य तृतीयसप्ताहतः |